HMMCW LIBRARY

**WEST BENGAL STATE UNIVERSITY**

B.A. Honours/Programme 1st Semester Examination, 2021-22

# SANHGEC01T/SANGCOR01T-SANSKRIT (GE1/DSC1)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

## SECTION-A

1. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः – 2×5 = 10

(क) 'जगतः पितरौ वन्दे'–इत्यत्र जगतः पितरौ कौ ? तयोः तुलना काभ्यां सह क्रियते ?

(ख) रघुवंशमहाकाव्यस्य एकस्य टीकाकारस्य तट्टीकायाश्च नामनी लिख्येताम्।

(ग) दिलीपस्य अर्थसाधनं किमभूत् ?

(घ) प्रजानां पिता दिलीपः कथमासीत् ?

(ङ) रघुवंशमहाकाव्ये कति सर्गा विद्यन्ते ? तस्य प्रथमसर्गस्य किं नाम ?

(च) किमर्थं मेरुपर्वतेन सह महाराजस्य दिलीपस्य कालिदासेन सादृश्यमुपस्थापितम् ?

(छ) 'जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ'– इत्यत्र 'पितरौ' इति पदे कीदृशी वृत्तिरस्ति ?

2. कस्यचिदेकस्य श्लोकस्य व्याख्या कार्या। 5×1 = 5

(क) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥

(ख) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव॥

अथवा

अधोलिखितेषु विषयमेकमाश्रित्य टीका लेख्या। 5×1 = 5

दिलीपः, संस्काराः प्राक्तना इव, वैवस्वतो मनुः।

## SECTION-B

3. पाठ्यांशमवलम्ब्य प्रकृतेः वैशिष्ट्यानि उपस्थाप्यन्ताम्। 10

अथवा

''निनिन्द रूपं हृदयेन''–इत्यत्र का कस्मात् कारणात् रूपं निनिन्द ? रूपस्य सार्थकतासम्पादनाय किं कर्तुमैच्छत् इति ग्रन्थमास्थाय वर्ण्यताम्। 1+2+7

4. अधोलिखितेषु श्लोकद्वयं व्याख्येयम्। 5×2 = 10

(क) मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्त्रिणः॥

(ख) इयेष सा कर्त्तुमबन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः।
अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः॥

(ग) अथाजिनाषाढधरः प्रगल्भवाक् ज्वलन्निव ब्रह्ममयेणा तेजसा।
विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा॥

## SECTION-C

5. नीतिशतकस्य पाठ्यांशमवलम्ब्य मूर्खाणां चारित्रिकवैशिष्ट्यमुपवर्ण्यताम्। 10

अथवा

'क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्'–अस्य तात्पर्यं व्याख्यायताम्। 10

6. अधोलिखितेषु कस्यचिदेकस्य श्लोकस्य सप्रसंगं व्याख्या कार्या। 5×1 = 5

(क) अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्माऽपि नरं न रञ्जयति॥

(ख) साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम्॥

अथवा

अधोलिखितेषु विषयमेकमाश्रित्य टीका लेख्या। 5

मृगतृष्णिका, विभूषणं मौनमपण्डितानाम्।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——